# Ganga Kavacham Divyamangala

# गङ्गाकवचम् दिव्यमङ्गलाख्यम्

## Document Information

Text title : Ganga Kavacham Divyamangala

File name : gangAkavachamdivyamangalAkhyam.itx

Category : devii, nadI, kavacha, devI

Location : doc_devii

Transliterated by : Shree Devi Kumar shreeshrii at gmail.com

Proofread by : Shree Devi Kumar shreeshrii at gmail.com

Latest update : July 31, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 31, 2020

*sanskritdocuments.org*

# गङ्गाकवचम् दिव्यमङ्गलाख्यम्

॥ श्रीगणेशाय नमः ॥

ऋषय ऊचुः –
भगवन्! सर्वधर्मज्ञ! सर्वशास्त्रविशारद! ।
श्रीगङ्गायास्तु कवचं ब्रूहि नो वदतां वर! ॥ १॥

गुप्तं सहस्रनामाख्यं स्तोत्रं परमपावनम् ।
इदानीं श्रोतुमिच्छामि गङ्गायाः कवचं शुभम् ॥ २॥

यस्य श्रवणमात्रेण गङ्गादेवी प्रसीदति ।
पापानि च विलीयन्ते वर्धन्ते धनसम्पदः ॥ ३॥

सनत्कुमार उवाच –
शृणुध्वं मुनयः सर्वे गुह्याद्गुह्यतरं परम् ।
जाह्नव्या दिव्यकवचं भुक्तिमुक्तिफलप्रदम् ॥ ४॥

ॐ अस्य श्रीगङ्गाकवचमन्त्रस्य श्रीसदाशिव ऋषिरनुष्टुप् छन्दः
संसारतारिणी श्रीगङ्गा देवता श्री बीजं गं शक्तिः गामिति कीलकं
मम सकलपापक्षयपूर्वकं मोक्षसाधने जपे विनयोगः ॥

अथ ध्यानं प्रवक्ष्यामि गङ्गायाः सुरदुर्लभम् ।
यत् कृत्वा मुनयः सम्यक् परां सिद्धिमितो गताः ॥ ६॥

नेत्रत्रयोद्भासितचारुदेहां श्वेताम्बरां चन्द्रकलात्मिकां च ।
माणिक्यमुक्ताफलभूषिताङ्गीं श्वेतातपत्रां करुणारसार्द्राम् ॥ ७॥

सूर्येन्दुकोटिद्युतिमङ्गनाभिः सचामराभिः परिवीज्यमानाम् ।
चतुर्भुजां हस्तचतुष्टयेन वराभये पद्मयुगं दधानाम् ॥ ८॥

दिव्यानुलेपेन विभूषिताङ्गीं दिव्यां दधानां स्रजमादिशक्तिम् ।
सुरैरनेकैर्ऋषिभिश्च दिव्यैर्निषेव्यमानामुपचारयोगैः ॥ ९॥

नानाविधान्पातकिनः प्रपत्रान् सन्तारयन्ती करुणादृशार्द्राम् ।
ध्यायेदिमां पूर्णशशांङ्कशुभ्रां नदैर्नदीभिः परिसेव्यमानाम् ॥ १०॥

एवं ध्यात्वा महादेवी गङ्गां त्रिभुवनेश्वरीम् ।
जपेन्मन्त्रं महादेव्यास्तस्योद्धारो निरूप्यते ॥ ११॥

प्रणवो वाग्भवं माया कामबीजं नमः पदम् ।
भगवत्यम्बिके अम्बालिके पदमथोद्धरेत् ॥ १२॥

महामालिनि तस्यान्त एह्योहि पदमुद्धरेत् ।
अशेषतीर्थालवाले मायालक्ष्मीर्मनोभवः ॥ १३॥

ततः शिवजटाजूटाधिरूढे पदमुद्धरेत् ।
गङ्गे गङ्गाम्बिके स्वाहा मनुर्द्विकरणाक्षरः ॥ १४॥

सर्वसम्पत्प्रदः सर्वपातकौघविनाशनः ।
सर्वकल्याणनिलयो गङ्गासान्निध्यकारकः ॥ १५॥

एतस्य मन्त्रराजस्य महादेव ऋषिः स्वयम् ।
विराट् छन्दः स्मृतं देवी जाह्नवी देवता स्वयम् ॥ १६॥

तारो बीजं वाग्भवं च शक्तिर्माया च कीलकम् ।
तारकं कामबीजं च मुक्तौ च विनियोगकः ॥ १७॥

कुर्यात् षडंङ्ग मन्त्रं स्वमायया प्रणवाद्यया ।
षड्दीर्घभिनयात्पश्चाज्जपेन्मन्त्रं शताष्टकम् ॥ १८॥

ततस्तु कवचं देव्याः पठेत् सर्वार्थसिद्धये ।
तदहं संप्रवक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ॥ १९॥

प्राच्यां श्रीजाह्नवी पातु याम्यां गङ्गा सदाऽवतु ।
भीष्मसूः पश्चिमायां मे उदीच्यां सुरनिम्नगा ॥ २०॥

भागीरथ्यग्निकोणे मां त्रिस्रोताः पातु नैर्ऋते ।
वायव्ये मां श्वेतवासा ईशाने त्रिपथस्थिता ॥ २१॥

ब्रह्मगङ्गा चोर्ध्वदेशमधः पातालजाह्नवी ।
दिग्विदिक्प्रान्तराले मां गङ्गा स्वर्गगताऽवतु ॥ २२॥

हृदस्ते पातु मे केशानभयं मे शिरोऽवतु ।
भालं मे कमलं पातु ध्रुवौ चन्द्रकलाऽवतु ॥

नेत्रे पातु जगद्धात्री ममोष्ठं विजयाऽवतु ।
विष्णुः पद्मधरं पातु श्रोत्रे पातु सुदर्शना ॥ २३॥

मन्दाकिनी दन्तपङ्क्तिं स्वर्गगागण्डयुग्मकम् ।
सुधाजला पातु जिह्वां वाणी पातु मुखं मम ॥ २४॥

तोतला तालुदेशं मे चिबुकं सर्वमङ्गला ।
मन्दाकिनी वक्रवृत्तं व्योम-गङ्गाजलं मम ॥ २५॥

कृकोटिकां कल्मषघ्नी स्कन्धयोः सुरनिम्नगा ।
कौर्मी पातु भुजद्वन्द्वं पाण्योः फलकमीश्वरी ॥ २६॥

कराङ्गुलीः पातु चान्द्री नखानाकाशचन्द्रिका ।
सूर्यमण्डलगा पातु कक्षां सागरतारिणी ॥ २७॥

वक्षःस्थलं पातु नित्यं देवी मेऽलकनन्दिका ।
हृदयं पातु चक्षुमें सीता पातूदरं मम ॥ २८॥

पार्श्वयोः पर्वतद्रावा स्तनौ सोमेश्वरी तथा ।
जगदुद्धारिणी नाभिं पृष्टं मकरवाहना ॥ २९॥

विष्णुशक्तिः कटिं पातु स्फिचौ पातु दयाम्बुधिः ।
विष्णु पादाब्जसम्भूता गुह्यं मे परिरक्षतु ॥ ३०॥

कृपाकोमलगात्री सा मूलाधारं ममावतु ।
स्वाधिष्ठानं पातु नित्यं पापादथ दवानला ॥ ३१॥

पायान्मे मणिपूरं सा शान्तनोः सुखवर्धिनी ।
अनाहतं सदा पायाद् भगीरथनिषेविता ॥ ३२॥

विशुद्धचक्रं मे पातु वशिष्ठोपासिताम्बिका ।
आज्ञाचक्रं मम प्रीत्या विश्वामित्रार्चिताऽवतु ॥ ३३॥

ब्रह्मरन्ध्रं सदा पातु स्रवत्पीयूषमन्दिरम् ।
स्वयम्भूलिङ्गिनी लिङ्गं कुण्डली परदेवता ॥ ३४॥

पतितोद्धारिणी पातु जठरं शङ्करप्रिया ।
जटालङ्कारिणी शम्भोरुरूयुग्मं ममावतु ॥ ३५॥

जानू मृडानी मे पातु जङ्घे पातु जगत्प्रसूः ।

लावण्यशेवधिः पातु गुल्फो गगनमेखला ॥ ३६॥

मत्स्यकक्षपहंसालिराजिता पातु पादयोः ।
पादांङ्गुलीः पातु नित्यं निश्रेणी समनोहरे ॥ ३७॥

रसासृङ्मांसमेदांसि पातु मे भवतारिणी ।
मनोबुद्धिमहन्तां मे पातु नारायणी सदा ॥ ३८॥

आयुः कल्याणदा पातु वयो रक्षतु वैष्णवी ।
भार्यां वृद्धिकरी पातु पुत्रान् वंशकरी मम ॥ ३९॥

गृहं रक्षतु लक्ष्मी में पातु क्षेत्रं शिवप्रिया ।
धर्मकर्त्री यशः पातु धर्मं पातु मनःस्विनी ॥ ४०॥

कुलं कुलेशी मे पातु सद्गतिं पातु सद्गतिः ।
जले स्थलेऽनलेऽरण्ये पाताले रणसङ्कटे ॥ ४१॥

दुर्गे गृहे जगन्नाथा पातु सर्वनदीश्वरी ।
अग्रतः पातु गङ्गोर्ध्वं पातु गङ्गा च पार्श्वयोः ॥ ४२॥

गङ्गैव पृष्ठतः पातु तथाधः पातु मे वपुः ।
इतीदं कवचं दिव्यं गङ्गायाः परमाद्भुतम् ॥ ४३॥

ऋषयः कथितं साक्षान्महापातकनाशनम् ।
एककालं द्विकालं वा त्रिकालं यः सदा पठेत् ॥ ४४॥

गङ्गायाः श्रावयेद्वापि तस्य पापं प्रणश्यति ।
वर्धन्ते सम्पदः सर्वाः सम्पद्यन्ते मनोरथाः ॥ ४५॥

जायते सिद्धयोऽष्टौ च नश्यन्ति विपदः क्षणात् ।
कुष्ठात् प्रमुच्यते कुष्ठी व्याधिभ्यश्चापि मुच्यते ॥ ४६॥

निर्मलं स्यान्मनस्तस्य विशुद्धं स्फटिकोपमम् ।
यस्य यस्य च देवस्य क्रियते पूजनं जपः ॥ ४७॥

तस्य तस्य प्रसादं सा गङ्गादेवी प्रयच्छति ।
पातकानामनेकानां प्रायश्चित्तं चिकीर्षुणा ॥ ४८॥

पठनीयं तु गङ्गायाः कवचं पातकापहम् ।
गङ्गामाहात्म्यविण्मन्त्री गङ्गा-कवचमभ्यसेत् ॥ ४९॥

स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ।
सर्वाणि तेन दानानि दत्तानि मुनिपुङ्गवाः ॥ ५० ॥

श्रीविष्णुस्तोषितस्तेन तोषितस्तेन शङ्करः ।
अर्घ्यदानेन सन्तुष्टः कृतस्तेन दिवाकरः ॥ ५२ ॥

तस्य पापानि नश्यन्ति महान्त्यपि न संशयः ।
नाभिमात्रे जले स्थित्वा यो गङ्गाकवचं पठेत् ॥ ५३ ॥

स स्वप्ने पश्यति क्षिप्रं जाह्नवी पुरतः स्थिताम् ।
इदं कवचमज्ञात्वा गङ्गामन्त्रं जपेन्नरः ॥ ५४ ॥

सर्वविघ्नैः स बाध्यः स्याद्व्याघ्रैर्मृगशिशुर्यथा ।
गङ्गा गङ्गेति यो ब्रूयाद् योजनानां शतैरपि ।
मुच्यते सर्वपापेभ्यो हरिसायुज्यमाप्नुयात् ॥ ५५ ॥

इदं गङ्गाजले स्थित्वा कवचं यः सकृज्जपेत् ।
भूतप्रेतपिशाचादिबाधाभ्यो मुच्यते क्षणात् ॥ ५६ ॥

पितरस्तृप्तिमायान्ति कवचस्यास्य पाठतः ।
श्राद्धकाले पठेन्मर्त्यो नयेत्स्वर्गं पितामहान् ॥ ५७ ॥

भूर्जे लिखित्वा कवचं मस्तके धारयेद्यदि ।
यत्र तत्र विपन्नोऽपि वाराणस्यां मृतो भवेत् ॥ ५८ ॥

मुनिभिः कथितं देव्याः जाह्नव्याः कवचोत्तमम् ।
यूयं पठध्वं सततं सद्गतिं समवाप्स्यथ ॥ ५९ ॥

॥ इति श्रीब्रह्माण्डपुराणे ऋषिसनत्कुमारसंवादे
गङ्गाया दिव्यमङ्गलं नाम कवचं सम्पूर्णम् ॥

शुभमस्तु ।

शुभमस्तु सर्वजगतः ।

॥ श्रीगङ्गायै नमः ॥

Encoded and proofread by Shree Devi Kumar shreeshrii at gmail.com

*Ganga Kavacham Divyamangala*

pdf was typeset on July 31, 2020

Please send corrections to *sanskrit@cheerful.com*